# संस्कृतवार्ता:

दिनाङ्क : 14/07/2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- भारतेन कथितं यत् चीनेन सह सम्बन्धानां निरन्तरं सामान्यीकरणेन लाभप्रद-परिणामाः अवास्यन्ते । डा. जयशङ्करः अद्य बीजिङ्ग्-नगरे चीनदेशस्य उपराष्ट्रपतिना हान्-झेङ्ग् इत्यनेन सह मेलनं अकरोत्
- शुभांशु-शुक्ला Axiom-4 इति अभियानस्य चालक-दलस्य त्रयाणां अन्यसदस्यानां च प्रत्यावर्तन-यात्रा अद्य सायं समारभत् ।
- अमेरिका पेट्रियाट्-वायु-रक्षासामग्रीं युक्रेन्-देशं प्रति प्रेषयिष्यति येन युद्धग्रस्तराष्ट्रस्य रशियादेशं विरुद्ध्य प्रवर्तमाने युद्धे साहाय्यं भविष्यति ।
- भारतीय-ऋतु-विज्ञान-विभागः इत्यनेन आगामि-दिवसद्वयं यावत् पश्चिम-बंगाल, राजस्थान, गुजरात, मध्य-प्रदेश-राज्येषु अत्यधिकस्य भीषणवृष्टेः अनुमानं व्यक्तीकृतमस्ति ।

-------------------------------------

<u>जयशङ्करः-चीनः</u>

विदेशमन्त्री डा. एस्. जयशङ्करः जटिल-अन्ताराष्ट्रिय-स्थितौ भारत-चीन-देशयोर्मध्ये मुक्त-विचार-विनिमयस्य महत्त्वं प्रतिपादितवान्। डा. जयशङ्करः अद्य बीजिङ्ग्-नगरे चीनदेशस्य उपराष्ट्रपतिना हान्-झेङ्ग् इत्यनेन सह मेलनं अकरोत् । सः अधोरेखितवान् यत् द्वयोः देशयोर्मध्ये सम्बन्धानां निरन्तरं सामान्यीकरणेन परस्पर-लाभप्रद-परिणामाः जनयितुं शक्यन्ते । अस्यां यात्रावधौ विहिता चर्चा सकारात्मक-गतिं प्राप्स्यति इति मन्त्रिणा विश्वासः अपि प्रकटितः।

सः अवदत् यत्, शाङ्घाई-सहयोग-सङ्घटने (एस्. सी. ओ.) भारतं सफलस्य चीनाध्यक्षस्य समर्थनं करोति । सः श्वः टियांजिन्-नगरे शाङ्घाई-सहयोग-सङ्घटनस्य विदेशमन्त्रिणाम् उपवेशने भागं ग्रहीतुं चीनदेशस्य द्विदिवसीय-यात्रायाम् अस्ति ।

-----------------------------------

## AXIOM-4:

भारतीयांतरिक्ष-यात्री-समूहस्य नायकः शुभांशु-शुक्ला Axiom-4 इति अभियानस्य चालक-दलस्य त्रयाणां अन्यसदस्यानां प्रत्यावर्तन-यात्रा अद्य सायं समारभत् । स्पेस-एक्स् इति संस्थानेन एक्स् इत्यस्मिन् लिखिते स्वकीये संदेशे अस्याः पुष्टिः कृता अस्ति यत् ड्रैगन-क्रू-कैप्सूल इत्येतस्य अन्ताराष्ट्रियान्तरिक्ष-स्थात्रात् पृथकीकरणं सञ्जातम् अस्ति ।

स्पेसएक्स-संस्थानम् अस्मिन् संदेशे अकथयत् यत् अंतरिक्षयानम् अधुना अंतरिक्षस्थात्रात् दूरं गन्तुं एकस्याः ज्वलनशृङ्खलायाः निष्पादनं करिष्यति । अनेन प्रोक्तं यत् ड्रैगन-पृथ्व्याः वायुमंडले पुनः प्रवेशं करिष्यति श्वः कैलिफ़ोर्नियायाः तटे सार्ध-द्वाविंशति-होरासु नीच्चैः आगमिष्यति । सफलागमनस्यानन्तरं, चालकदल-नायकः शुक्ला, अन्ये चालक-दलसदस्याः च पृथ्व्याः गुरुत्वाकर्षणस्य अनुकूलं भवितुं चिकित्सकानां पर्यवेक्षणे सप्तदिवसानां पुनर्वास-कार्यक्रमे स्थास्यन्ति । अवधेयं यत् दलनायकः शुक्लावर्यः अन्तराष्ट्रिय-अंतरिक्ष-स्थात्रस्य चतुर्दिवसीयाभियाने अस्ति । सः अन्तराष्ट्रिय-अंतरिक्ष-स्थात्रस्य यात्रां कुर्वाणः प्रथम-भारतीयः विंग-कमांडर-राकेश-शर्मणः अनन्तरं द्वितीयः भारतीयान्तरिक्षयात्री सञ्जातः ।

-----------------------------------

## अमेरिका-यूक्रेन-प्रक्षेपास्त्रम्

अमेरिका पेट्रियाट्-वायु-रक्षासामग्रीं युक्रेन्-देशं प्रति प्रेषयिष्यति येन युद्धग्रस्तराष्ट्रस्य रशियादेशं विरुद्ध्य प्रवर्तमाने युद्धे यूक्रेनस्य साहाय्यं भविष्यति । अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड्-ट्रम्पः मेरिल्याण्ड्-नगरस्य जायंट-बेस्-एन्ड्रूस्-इत्यत्र प्रसारमाध्यमान् अवदत् यत् सः अद्यापि युक्रेन्-देशस्य कृते दीयमानानां पेट्रियाट्-प्रक्षेपास्त्राणां सङ्ख्यायाः विषये सहमतः नास्ति, परन्तु तेषां कृते कानिचन् प्रक्षेपास्त्राणि प्रदास्यन्ते यतः यूक्रेनाय रक्षणस्य आवश्यकता वर्तते । कीव-नगरं

प्रति कानिचन् शस्त्राणां वितरणं स्थगयितुं अमेरिकायाः निर्णयस्य केवलं सप्ताहद्वयानन्तरं वाशिङ्ग्टन्-देशस्य एतत् वक्तव्यम् समागच्छत् ।

---------------------------------------

## चन्द्रयानतृतीयम्-प्रक्षेपणम्

भारतस्य विज्ञानस्य दृढनिश्चयस्य च ऐतिहासिकसिद्धिः चन्द्रयान-तृतीयम् अद्य वर्षद्वयं पूरयति। अस्य अभियानस्य प्राथमिकं उद्देश्यं चन्द्रस्य दक्षिणध्रुवस्य समीपं उच्चभूमौ लैण्डर-रोवर इत्यनयोः सफलस्थापनं, आद्यन्तस्थापनस्य परिभ्रमणस्य च क्षमतायाः प्रदर्शनम् आसीत् । अवधेयं यत् वर्षद्वयपूर्वम् अस्मिन् एव दिने, भारतीयान्तरिक्ष-अनुसंधान-सङ्घटनम् इत्यनेन विकसितेन एलवीएम3-एम4-प्रक्षेपकेण चंद्रयान-तृतीयं सफलतापूर्वकं कक्षायां संस्थापितम् आसीत् ।

---------------------------------------

## विशाखापट्टनम्-बिम्स्टेक

केन्द्रीय-नौवहन-जलमार्ग-मन्त्रिणा सर्वानन्दसोनोवालः इत्यनेन अद्य विशाखापत्तनम-नगरे बहुक्षेत्रीय-तान्त्रिक्यार्थिक-सहयोगाय **बे-आफ़्-बेङ्गाल-इनिशियेटिव्** इत्यस्य द्विवार्षिक-नौकाश्रय-सम्मेलनस्य आरम्भः कृतः। अस्मिन् अवसरे, श्री सोनोवालवर्यः अवदत् यत् भारतस्य प्रतिवेशि-प्रथम इति नीतिः क्षेत्रीय-समुद्रीय-क्षेत्रे सहयोगस्य नेतृत्वाय तस्य प्रतिबद्धतायाः उदाहरणम् अस्ति ।

द्विवार्षिकसम्मेलने क्षेत्रीय-समुद्रीय-सम्पर्कस्य अविचलप्रतिबद्धतायाः च विषये, समुद्रतटीय-राष्ट्राणां मध्ये सहयोग-सम्वर्धनाय विचारः भविष्यति ।

---------------------------------------

## दिल्ली-न्यायालयः-राष्ट्रिय-हेराल्ड-प्रकरणम्

दिल्ल्यां राउस्-एवन्यू-न्यायालयेन अद्य नेशनल्-हेराल्ड-धनशोधन-प्रकरणस्य विषये काङ्ग्रेस-दलस्य वरिष्ठनेत्रीं सोनिया-गान्धीं समेत्य वरिष्ठनेतारं राहुल-गान्धीं विरुद्ध्य

प्रवर्तननिदेशालयस्य अभियोजन-परिवादस्य संज्ञानम् आदाय स्वस्य आदेशं सुरक्षितम् अस्ति । न्यायालयेन अस्य मासस्य नवविंशति-दिनाङ्के आदेशार्थं एतत्प्रकरणं सूचीबद्धम् कृतम् अस्ति। नेशनल्-हेराल्ड-प्रकरणस्य पूरक-आरोपपत्रस्य संज्ञानं ग्रहीतुं वा इति विषये अयं विषयः सम्बद्धः आसीत्, यस्मिन् काङ्ग्रेस्-नेतृणां विरुद्धं धनशोधनस्य आरोपः कृतः अस्ति। सर्वे अभियुक्ताः आरोपपत्रं स्वीकृत्य ई. डी. इत्यस्य आवेदनस्य विरोधं कृतवन्तः, आरोपान् निराकृतवन्तः च।

एतत् प्रकरणं नेशनल-हेराल्ड-प्रकरणे पूरकारोपपत्रस्य संज्ञानग्रहणस्य विषयेन सम्बद्धम् आसीत्, यस्मिन् कांग्रेस्-नेतृन् विरुध्य धनशोधनस्य आरोपाः प्रख्यापिताः सन्ति । सर्वे एव आरोपिणः आरोपपत्रस्य संज्ञाने प्रवर्तननिदेशालयस्य याचिकां विरुध्य विरोधं प्रकटितवन्तः सन्ति , प्रख्यापिताः आरोपाः निराधाराः सन्ति इति अपि अकथयन् ।

-------------------------------------

## वाड्रा: प्रवर्तन-निदेशालयः

प्रवर्तननिदेशालयः शस्त्रविक्रेतुः सञ्जय-भंडारी इत्यनेन सम्बद्धस्य धनशोधन-प्रकरणस्य विषये काङ्ग्रेस-दलस्य वरिष्ठायाः नेत्र्याः प्रियङ्का-गान्धी-वाड्रा इत्यस्याः पतिना राबर्ट्-वाड्रा इत्यनेन परिपृच्छा करोति । नवदिल्ल्याः प्रवर्तननिदेशलयस्य कार्यालये एषा परिपृच्छा प्रचलति । इतः पूर्वं, वाड्रा तस्य उद्योगसंस्थानद्वारा गुरुग्राम्-नगरे भू-क्रयण-सम्बद्धे अन्यस्मिन् धनशोधन-प्रकरणे प्रवर्तननिदेशालयेन परिपृष्टः आसीत् ।

-------------------------------------

## भुवनेश्वर- राष्ट्रपतियात्रा

राष्ट्रपतिः द्रौपदी-मुर्मू-वर्या अद्य अपराह्णे भुवनेश्वरं प्राप्तवती । अद्य समारभ्य सा स्वकीयस्य गृह-राज्यस्य ओडिशायाः द्विदिवसीयायां यात्राम् अस्ति । ओडिशायाः राज्यपालः हरि-बाबू-कंभामपतिः, मुख्यमंत्री मोहन-चरण-माँझी, अन्ये वरिष्ठाः गणमान्यजनाः , विविधाः पारंपरिकाः लोक-नर्तकाः बीजू-पटनायक-अंतर्राष्ट्रीय-विमानस्थात्रे तस्याः स्वागतम अकुर्वन् । ततः राष्ट्रपतिवर्या भुवनेश्वरस्थम् अखिल-भारतीय-आयुर्विज्ञान-संस्थानं गत्वा मुख्यतिथि-रूपेण संस्थानस्य पञ्चमे दीक्षांत-समारोहे भागम् अभजत् ।

प्रधानमंत्री नरेंद्रमोदी अभिनेत्र्याः बी. सरोजा-देवी इत्यस्याः निधने शोकः व्यक्तीकृतः अस्ति । एकस्मिन् सार्वजनिक-संदेशमाध्यमे , श्रीमोदी अकथयत् यत् बी. सरोजादेवी इत्येषा भारतीय-चलच्चित्रस्य संस्कृतेः च एका अनुकरणीया छविरूपेण संस्मरिष्यते ।

---------------------------------------

## भारतीय-ऋतुविज्ञानविभागः

भारतीय-ऋतु-विज्ञान-विभागः इत्यनेन आगामि-दिवसद्वयं यावत् पश्चिम-बंगाल, राजस्थान, मध्य-प्रदेश, झारखंड,ओडिशा-राज्येषु अत्यधिकस्य भीषणवृष्टेः अनुमानं व्यक्तीकृतमस्ति । आकाशवाण्या सह जातायां विशिष्टवार्तायां , ऋतु-विज्ञान-विभागस्य वैज्ञानिकः डॉ. नरेश-कुमारः प्रोक्तवान् यत् द्वयोः निम्न-दाब-प्रणाल्योः संभावना अस्ति, एकः उत्तर-पश्चिम-मध्यप्रदेशे तस्य प्रतिवेशि-क्षेत्रेषु च , अपरः उत्तर-पश्चिम-बंगाल-खाड़ी-क्षेत्रे सन्निकटस्थेषु क्षेत्रेषु च भवितुं शक्नोति ।

।।इति वार्ता।।